दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-195

1

मई 08, 2026

Website- www.himsanskritam.com

Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णषष्ठी-सप्तमी
बैशाख 25 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचल-राज्य-चयन-आयोगेन आङ्ग्ल-शिक्षकानां ३१२ पदानां कृते सीबीटी-परिणामः घोषितः

3 शिमला-: हिमाचलप्रदेशोच्च-न्यायालयेन शास्त्री-अध्यापकानां नियुक्तौ अन्तरिम-प्रतिबन्धः आरोपितः

4 संस्कृतं मधुरं सदा -२६ यदा कश्चन मनुष्यः सर्वान् प्राणिनः परमात्मनि एव निरन्तरं पश्यति...

## पश्चिमबङ्गालराज्ये

### नूतनसर्वकारस्य निर्माणार्थं राजनैतिकसंवादाः तीव्राः जाताः



पश्चिमबङ्गालराज्ये नूतनसर्वकारस्य निर्माणार्थं राजनैतिकसंवादाः तीव्राः जाताः। पश्चिमबङ्गालराज्ये, भाजपेति दलस्य विधायकस्य सुभेन्दु अधिकारिणः निकटसहायकस्य हत्यायाः विषये, राज्य-आरक्षकैः त्रयः जनाः निगडिताः सन्ति। आरक्षकैः सप्तसदस्यीयाः विशेष-अन्वेषण-दलं (एस्.आई. टि.) अपि निर्मितम्। एतत् सी. आई. डी. दलस्य आई. जी. इत्यस्य निरीक्षणे कार्यं करिष्यति। दलस्य सदस्येषु सी.आई. डी., एस्. टी. एफ्., राज्यारक्षी दलस्य गुप्तचरशाखायाः च अधिकारिणः सम्मिलिताः भविष्यन्ति।

## आपरेशन-सिन्दूर इत्यस्य प्रथमवार्षिकोत्सवम् आचरितम्; भयोत्पादनस्य पराजये, तस्य सक्षम-विधिव्यवस्थायाः विनाशे च भारतस्य प्रतिबद्धतां पुनः दृढीकृतम्




प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् देशः आतङ्कवादं पराजयितुं, तस्य समर्थकं विधिव्यवस्थां च विघटयितुं दृढः अस्ति। सिन्दूराभियानस्य एकवर्षस्य पूर्त्यवसरे सामाजिकान्तर्जालीये पटले श्रीमोदी अवदत् यत् भारतीय-सशस्त्र सेनया अभियानावधौ अपूर्वं साहसम्, स्पष्टतां, सुदृढं संकल्पं च प्रदर्शितम्। सः अवदत् यत् पहलगाम इत्यत्र निर्दोष-भारतीयेषु आक्रमणस्य साहसं कर्तृषु सैनिकाः समुचितं प्रतिकारं कृतवन्तः। श्रीमोदी अग्रे अवदत् यत् सशस्त्रसेनायाः शौर्यस्य सम्पूर्णः देशः अभिवादनं करोति। प्रधानमन्त्री अवदत् यत् आतङ्कवादस्य विरुद्धं भारतस्य दृढप्रतिक्रियाः, राष्ट्रियसुरक्षायाः रक्षणाय तस्य अविचलप्रतिबद्धतायाः च प्रतिबिम्बः एव आपरेशन सिन्दूर इति अस्ति । राष्ट्रपति द्रौपदी मुर्मुः उपराष्ट्रपति सी.पी. राधाकृष्णन वर्यः चापि स्व मनोभावं समाजिकान्तर्जालीये पटले प्रकटितवन्तौ।

## सुभाषितम्

**न तीव्रतपसां कुर्याद्,**
**धैर्यविप्लवचालनम्।**
**नेत्राग्निशलभीभावं,**
**भवोऽनैषीन् मनोभवम्।।**

भावार्थः- तीव्र तपस्वियों के धैर्य को डिगाने की चंचलता नहीं करनी चाहिए। ऐसा करने से ही कामदेव, शिव की नेत्राग्नि से भस्म हो गया था।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सर्वकारेण चत्वारिंशत् वर्षतः अधिकवयस्कानां कर्मचारिणां कृते राष्ट्रव्यापी-वार्षिक-स्वास्थ्य-परीक्षणोपक्रमं समारब्धम्



श्रम-वृत्यावसर-मन्त्री डा. मनसुख-माण्डविया नूतन-श्रम-संहितायाः अन्तर्गतं चत्वारिंशत्-वर्षतः अधिक-वयस्कानां कर्मचारिणां कृते राष्ट्रव्यापी-वार्षिक-स्वास्थ्य परीक्षण-उपक्रमम् आरब्धवान्। नवदिल्लयाः कर्मचारी-राज्य-आश्वस्ति-निगमस्य (ई.एस्.आई.सी.) चिकित्सा-महाविद्यालये चिकित्सालये च उपक्रमस्य आरम्भं कुर्वन् मन्त्री अवदत् यत् प्रधानमन्त्री-नरेन्द्र-मोदिनः नेतृत्वे गत-द्वादश-वर्षेषु देशस्य कार्यबलस्य युवाशक्तेः च सम्मानः महत्त्वपूर्णरूपेण वर्धितः अस्ति। सः अवदत् यत् सर्वकारः वृत्यवसराणां सर्जनाय निरन्तरं प्रयतमानः अस्ति। परिणामतः निरुद्योग-दरः प्रायः त्रि-दशमलव-द्वि प्रतिशतं यावत् न्यूनीकृतः अस्ति।

## बिहार-राज्ये मुख्यमन्त्री-सम्राट-चौधरी-इत्यस्य नेतृत्वे मन्त्रिमण्डलस्य विस्तारः अभवत्




### नितीश-कुमारस्य पुत्रेण सह द्वात्रिंशत् मन्त्रिणः च नूतन-मन्त्रिमण्डले शपथ-वचनं स्वीकृतवन्तः

बिहार-राज्ये मुख्यमन्त्री-सम्राट-चौधरी-इत्यस्य नेतृत्वे मन्त्रिमण्डलस्य विस्तारः अभवत्। पटना-नगरस्य गान्धी-मैदान इत्यत्र आयोजिते भव्य-समारोहे राज्यपालः सेवानिवृत्तः लेफ्टिनेण्ट्-जनरल्-सैयद्-अता-हस्नैन् द्वात्रिंशत् नवनियुक्तेभ्यः मन्त्रिभ्यः पदस्य गोपनीयतायाश्च शपथं प्रदत्तवान्। मन्त्रिमण्डले अधुना भारतीय जनता पार्टीति दलस्य पञ्चदश, जनता दल-यूनाइटेड-दलस्य त्रयोदश, (रामविलास्) लोक-जनशक्ति-दलस्य द्वौ, हिन्दुस्तानी-आवाम्-मोर्चा तथा राष्ट्रिय-लोक-मोर्चा-दलयोः प्रत्येकतः एकः मन्त्री अस्ति। मन्त्रिणः प्रथमं पञ्च-समूहेषु, ततः षट्-समूहेषु च शपथं स्वीकृतवन्तः। शपथग्रहण-समारोहे सम्मिलितेषु प्रमुखेषु मन्त्रिषु जनता-दल-यूनाइटेड-दलस्य अध्यक्षस्य नितीश कुमारस्य पुत्रः निशान्त-कुमारः अपि आसीत्। उल्लेखनीयम् अस्ति यत् नितिश कुमारः गत-मासे राज्यसभां प्रति गन्तुं मुख्यमन्त्रीपदात् त्यागपत्रं समर्पितवान्।

## तमिलनाडु-केरल-राज्ययोः सर्वकार-निर्माणार्थं तीव्रसंवादाः प्रचलन्ति

तमिलनाडु-राज्ये टी. वी. के. प्रमुखः जोसेफ विजयः लोकभवने द्वितीयवारं राज्यपालेन विश्वनाथ अर्लेकर वर्येण सह मिलितवान्। राज्यपालेन एव तस्मै आहूतम् इति कथ्यते। तेन सह मेलनानन्तरं राज्यपालः अपि केरल राज्यं प्रति प्रस्थास्यति इति सम्भावना विद्यते। इतः पूर्वमपि विजयः राज्यपालेन सह मिलित्वा दलस्य विधायकानां सूचीं, काङ्ग्रेस्-दलस्य समर्थनपत्रं च उपस्थापितवान् आसीत्। अस्मिन् समये बहुमतं प्रदर्शयितुं तस्य समर्थनस्य आवश्यकता आसीत्। वी. सी. के. दलस्य नेता थिरुमा-वलवनः अवदत् यत् तस्य दलम् विधायकदलस्य सभायाः अनन्तरं विजयस्य समर्थनाय निर्णयं करिष्यति।

## दक्षिणभारतस्य बहुषु स्थानेषु प्रचण्डवृष्टेः सम्भावना

भारत-ऋतु-विभागेन आगामि-दिन-द्वयोः केरलम्-माहे-दक्षिणान्तरिक-कर्नाटक-तमिल्नाडु-पुदुचेरी-करैकल-इत्येतेषां राज्यानां पृथक् पृथक् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। श्वः यावत् उत्तरप्रदेशे, आन्ध्रप्रदेश, बिहारे, छत्तीसगढ़े, गोवाराज्ये च मेघस्फोटेन सह वृष्टेः तीव्रवायोः च सम्भावना अस्ति इति ऋतु-विभागेन उक्तम्। श्वः मध्यप्रदेशे, मध्य-महाराष्ट्र, मराठ्वाडायां, अण्डमान्-निकोबार्-द्वीपयोः, देशस्य पूर्वोत्तरराज्येषु च एतादृशेः स्थितेः संभावना विद्यते।

# हिमाचल-राज्य-चयन-आयोगेन आङ्ग्ल- शिक्षकानां ३१२ पदानां कृते सीबीटी- परिणामः घोषितः





**हिमसंस्कृतवार्ताः- हमीरपुरम्।** हिमाचलप्रदेश- राज्य- चयन- आयोगेन आङ्ग्ल- भाषायाः शिक्षकानां ३१२ पदानां (पोस्ट-कोड २६००२) कृते निश्चित-मानदेय-आधारेण नियुक्त्यर्थं ३ अप्रैल दिनाङ्के आयोजितायाः सङ्गणक- आधारित- चयन- परीक्षायाः (CBT) इत्यस्य परिणामः घोषितः। परीक्षायाः परिणामः आयोगस्य जालपुटे https://hprca.hp.gov.in इत्यत्र उपलब्धः अस्ति। आयोगस्य सचिवेन डॉ. विक्रम-महाजनेन उक्तं यत् अस्यां परीक्षायाम् उत्तीर्णानां ४८९ अभ्यर्थिनां 'प्रमाणपत्र-सत्यापन' प्रक्रिया ८ जून दिनाङ्के प्रातः १०:०० वादतः आयोगस्य परिसरे आरप्स्यते। अस्याः समयसारिणी पृथक्तया जालपुटे आरोपयिष्यते। अभ्यर्थिनः तेषाम् ई-मेल-माध्यमेन सूचयिष्यन्ते। तेभ्यः पृथक्तया आह्वान-पत्राणि न प्रेषयिष्यन्ते।

**सत्यापन-काले एते प्रलेखाः अनिवार्याः**

प्रमाणपत्र-सत्यापन-काले एतेभ्यः अभ्यर्थिभ्यः स्वसह सर्वेषाम् आवश्यकानां प्रलेखानां मूलप्रतयः, तासां स्वयं-प्रमाणित-छायाचित्राणां द्वे द्वे पुटके, आवेदन-पत्रस्य 'डाउनलोड' कृता प्रतिः तथा च परिचय-पत्रम् आनेतव्यं भविष्यति। आङ्ग्ल- शिक्षकानां पदेभ्यः ३,११९ अभ्यर्थिनः आवेदनं कृतवन्तः आसन्, येषु २,४१४ अभ्यर्थिनः परीक्षां दत्तवन्तः। अधुना २,४१४ अभ्यर्थिषु ४८९ अभ्यर्थिनः परीक्षायाम् उत्तीर्णाः अभवन्। सचिवेन स्पष्टीकृतं यत् यदि कश्चित् अभ्यर्थी निश्चित-तिथौ सत्यापनार्थं उपस्थितः न भवति, तर्हि तस्मै अन्यः अवसरः न प्रदास्यते।

# 'आईएएस- आईपीएस- आईएफएस' अधिकारिणां संवर्गं न्यूनीकरिष्यति सुक्खु- सर्वकारः, केन्द्रसर्वकाराय प्रेषितं पत्रम्




**> प्रशासनिक-संरचनायाः सुदृढीकरणाय अनावश्यक-व्यय-न्यूनीकर्तुं च बलं दत्तम्**

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सुक्खु-सर्वकारेण प्रशासनिक- संरचनायां व्यापक-परिष्कारस्य दिशि दृढं पदक्षेपं स्वीकृत्य अखिलभारतीय-सेवानां यथा आईएएस, आईपीएस तथा आईएफएस इत्येतेषां संवर्गं तर्कसङ्गतं कर्तुं प्रक्रिया आरब्धा, येन अनावश्यक- व्ययं न्यूनीकृत्य जनहितकारि-कार्येषु अधिकं धनं व्ययितुं शक्येत्। पूर्वमपि अनेके सर्वकाराः अस्मिन् विषये चिन्तनं कृतवन्तः, किन्तु किमपि दृढनिर्णयः न जातः। अस्मिन् वारे सर्वकारेण अग्रे गत्वा वास्तविकाः पदक्षेपाः स्वीकृताः।

सूत्राणाम् अनुसारं राज्यसर्वकारेण भारतीय-प्रशासनिक- सेवा (IAS) अधिकारिणां सङ्ख्यायां कर्तनस्य (कटौती) प्रस्तावः केन्द्रसर्वकाराय प्रेषितः। वर्तमाने 'आईएएस' अधिकारिणां स्वीकृतसंवर्गः १५३ अस्ति, यं न्यूनीकृत्य १४७ कर्तुं प्रस्तावः कृतः। एवमेव, भारतीय-वन-सेवा (IFS) अधिकारिणां स्वीकृत-पदानि ११४ तः न्यूनीकृत्य ८३ कर्तुं विस्तृतः प्रस्तावः पूर्वमेव केन्द्रसर्वकाराय प्रेषितः, यस्य निर्णयः अन्तिमचरणे वर्तते। एतदतिरिच्य राज्यसर्वकारः आगामिकाले भारतीय- आरक्षकसेवा अधिकारिणां संवर्गस्य समीक्षां कर्तुम् अपि विचारं करोति, येन एषः संवर्गः अपि तर्कसङ्गतः भवेत्। सर्वकारस्य मान्यता अस्ति यत् विद्यमान-संसाधनानां उत्तमप्रबन्धनेन अधिकारिणां प्रभावी-उपयोगेन च राजकीय-कार्यं सुचारुं कर्तुं शक्यते। आवश्यकतायाः अधिकानि पदानि न केवलं प्रशासनिक-दृष्ट्या अव्यावहारिकानि सन्ति, अपितु राज्यस्य उपरि अनावश्यकम् आर्थिक-भारमपि जनयन्ति। यत् धनं जनहितकारि-कार्येषु व्ययितव्यं, तत् अधिकारिणां वेतने गच्छति। एकस्य 'आईएएस' अथवा 'आईएफएस' अधिकारिणः उपरि प्रायशः प्रतिवर्षं ४५ लक्षतः ५० लक्ष-रूप्यकाणि व्ययः भवति। न्यूनतायाः अनन्तरं राज्यस्य प्रतिवर्षं कोटि-रूप्यकाणां रक्षा भविष्यति, एतत् धनं च जनकल्याणकारी-योजनासु विकास-कार्येषु च विनियोक्तुं शक्यते। राज्यसर्वकारेण अयं प्रस्तावः निर्माणे सति सर्वेषां प्रशासनिक- वित्तीय- कार्यात्मक-पक्षाणां गहनम् अध्ययनं कृतम् अस्ति। केन्द्रसर्वकाराय प्रेषिते प्रस्तावे ठोस- आधाराः औचित्यं च प्रस्तुतं, येन अस्य परिष्कारस्य स्वीकृति-प्राप्तेः आशा वर्तते।

# विद्यालयीय-शिक्षा-मण्डलम् परीक्षा-स्वरूपं परिवर्तयिष्यति, नवम-दशम-कक्षययोः प्रश्नपत्रेषु भविष्यन्ति परिवर्तनानि



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-विद्यालयीय- शिक्षा- मण्डलं स्वकीयां मूल्याङ्कन-प्रणालीं पूर्णतया आधुनिकीं वैज्ञानिकीं च कर्तुं सज्जं वर्तते। मण्डलस्य अध्यक्षेण डॉ. राजेशशर्मणा उक्तं यत् शिक्षायाः गुणवत्तायां परिष्कारार्थं विद्यार्थिनां व्यावहारिकबोधस्य परीक्षणार्थं च धर्मशालायां नवम-दशम-कक्षययोः सर्वेषां विषयाणां कृते एकस्याः विशेष-त्रिदिवसीय-कार्यशालायाः सफलं आयोजनं कृतम्। अस्य आरम्भस्य मुख्योद्देश्यं विद्यालयीयपरीक्षाः 'कण्ठस्थीकरण-विद्यातः' (रटंत विद्या) मुक्तां कृत्वा अवधारणात्मक-स्पष्टतां प्रति नेतुम् अस्ति। कार्यशालायाः अन्तराले शिक्षाविशेषज्ञैः हिमाचलमण्डलस्य प्रश्नपत्राणां तुलना देशस्य अन्यैः प्रतिष्ठित-मण्डलैः यथा 'सीबीएसई' (CBSE) तथा 'आईसीएसई' (ICSE) इत्येतयोः स्वरूपैः सह कृता।डॉ. शर्मणा सूचितं यत् मण्डलस्य पाठ्यक्रमस्य, 'ब्लूप्रिण्ट' इत्यस्य तथा अङ्कन-योजना इत्यस्य च गहनतया अवलोकनं कृतम् अस्ति। अस्य उद्देश्यं तादृशी मूल्याङ्कन-प्रक्रिया निर्मातुं वर्तते या न केवलं सन्तुलिता, अपितु पूर्णतया पारदर्शिनी अपि भवेत्, येन हिमाचलस्य विद्यार्थिनः राष्ट्रिय- स्तरीय- प्रतिस्पर्धासु पृष्ठतः न तिष्ठेयुः। डॉ. राजेश शर्मणा इयं कार्यशाला प्रदेशस्य शिक्षा-प्रणाल्यां 'क्रान्तिकारी-परिवर्तनम्' इति वर्णिता। तेन उक्तं, "अस्माकं लक्ष्यं शिक्षा-प्रणालीं आधुनिकीं राष्ट्रिय- मानकानुगुणां च कर्तुम् अस्ति।"

## 'परख-टेक्सोनॉमी' इत्याधारेण निर्मिताणि भविष्यन्ति आदर्श-प्रश्नपत्राणि

शिक्षा-मण्डलस्य अध्यक्षेण स्पष्टीकृतं यत् भविष्यस्य प्रश्नपत्राणि अधुना 'परख-टेक्सोनॉमी' इत्यस्य मानकानुसाराणि भविष्यन्ति। एतदर्थं आदर्शप्रश्नपत्राणां निर्माणे विशेषं बलं दत्तम्। नूतन- व्यवस्थायाः अन्तर्गतं प्रश्नपत्रेषु २० तः ३० प्रतिशतं प्रश्नाः 'क्षमता-आधारिताः' भविष्यन्ति। एते प्रश्नाः साक्षात् विद्यार्थिनः तार्किक-क्षमतायाः विषयस्य व्यावहारिकबोधस्य च परीक्षणं करिष्यन्ति, येन केवलं उत्तराणि कण्ठस्थीकुर्वतां छात्राणां स्थाने विषयम् अवगच्छन्तः छात्राः लाभान्विताः भविष्यन्ति।

# पूर्वम् भविष्यति करकापातेन जातायाः हानेः आकलनम्, ततः परं साहाय्य-विषये निर्णयः- जगतसिंहनेगी

**हिमसंस्कृतवार्ताः- शिमला।** राजस्वमन्त्री जगतसिंहनेगी अवदत् यत् वातावरणस्य प्रकोपजन्य-हानेः आकलनात् परमेव साहाय्य-विषये निर्णयः भविष्यति। अनेक-स्थानेषु करकापातेन (ओलावृष्टि) प्रतिकूल-वातावरणेन च पुष्पोद्भवः (फ्लावरिंग) प्रभावितः अस्ति। गुरुवासरे राज्यसचिवालयपरिसरे माध्यमैः सह सम्भाषणकाले राजस्व-मन्त्रिणा उक्तं यत् प्रदेशे निरन्तरं परिवर्तमानं वातावरणं मई-मासे अपि विद्यमानं शैत्यं च उद्यान-कृषि-क्षेत्रं प्रभावितं कृतवत्। राजस्वमन्त्री जगतसिंहनेगी अवदत् यत् प्रदेशे जातायाः हानेः विस्तृतम् आकलनं क्रियते। प्रतिवेदने प्राप्ते सति एव साहाय्यं प्रति अन्तिमः निर्णयः स्वीकरिष्यते। शिमला-सहित-प्रदेशस्य अनेकेषु क्षेत्रेषु फलसस्येषु ऋतोः प्रभावः स्पष्टतया दृश्यते। अनेकेषु स्थानेषु करकापातेन प्रतिकूल- वातावरणेन च 'पुष्पोद्भव-प्रक्रिया' प्रभाविता, येन उद्यानपालकाः हानिं सोढवन्तः। जगतनेगीमहोदयेन उक्तं यत् सर्वकारपक्षतः साहाय्यराशेः व्यवस्था क्रियते, किन्तु एषा सहायता सीमिता भवति। तेन ज्ञापितं यत् केन्द्रसर्वकारः निरन्तरं प्रार्थ्यते यत् 'वातावरण-आधारित' सस्य- बीमा- योजनया सह अधिकाधिक- उद्यानपालकाः योजनीयाः। प्रदेशे प्रायः सार्ध- त्रिलक्ष उद्यानपालकाः सन्ति, परन्तु एतेषु ७५ सहस्रतः अपि न्यूनाः जनाः सस्यबीमां कृतवन्तः। ये कृषकाः उद्यानपालकाः च बीमां स्वीकृतवन्तः, तेभ्यः हानेः स्थितौ श्रेष्ठं साहाय्यं प्राप्तम्। वर्षे २०२३ तथा २०२५ मध्ये प्राकृतिक-आपदा-काले प्रदेशसर्वकारेण आर्थिक-आह्वानानां सत्यपि प्रभावितेभ्यः जनेभ्यः केन्द्रतः प्राप्यमाण- साहाय्यात् बहुगुणं अधिकं साहाय्यं दत्तम् आसीत्। तथापि प्रत्येकवारं तस्मिन् स्तरे साहाय्यदानं सम्भवं न भविष्यति। राजस्व-मन्त्रिणा उक्तं यत् नगर- निगम- पञ्चायत-मण्डलपरिषद्-निर्वाचनानां कृते काङ्ग्रेस-पक्षस्य प्रचारः शीघ्रमेव तीव्रः भविष्यति। निर्वाचनेषु 'विकासः' मुख्यः विषयः अस्ति, सर्वाभिः संस्थाभिः स्वाधिकारानुसारम् उपलब्ध- धनराशि- अनुसारं च कार्यं करणीयम्।

# विकसितभारत-जी-राम-योजनायाः हिमाचलप्रदेशे प्रवर्तनम्




हिमाचलप्रदेशे अन्ते केन्द्रसर्वकारस्य नवीना योजना 'विकसितभारत-गारण्टी-रोजगार-आजीविका-मिशन् (ग्रामीणम्)' अर्थात् वी.बी.जी. राम (VB-G RAM) इति प्रवर्तिता। केन्द्रसर्वकारेण मनरेगा-योजनायाः स्थाने एषा नवीना योजना प्रवर्तिता अस्ति। पूर्वं हिमाचलसर्वकारः अस्य परिवर्तनस्य विरोधं कृतवान् आसीत्, दिसम्बरमासे प्रस्तावितां विशेषग्रामसभां च स्थगितवान् आसीत्। परन्तु इदानीं राज्यसर्वकारः अस्याः नूतनयोजनायाः कार्यान्वयनाय सम्मतिं दत्तवान्। केन्द्रसर्वकारेण अपि अस्य कृते प्रथमः किश्तः (Instalment) प्रदत्तः।

हिमाचलप्रदेशे अन्ततः केन्द्रसर्वकारस्य नवीना योजना 'विकसितभारत-गारण्टी-रोजगार-आजीविका-अभियानम् (ग्रामीणम्)' अर्थात् 'वी.बी.जी. राम' इति प्रवर्तिता। केन्द्रसर्वकारेण इयं योजना 'मनरेगा' इत्यस्य स्थाने आनीता। हिमाचलसर्वकारेण पूर्वम् अस्य परिवर्तनस्य विरुद्धं पक्षः स्वीकृतः आसीत्, दिसम्बरमासे आयोजिता विशेषग्रामसभा अपि न कृता।

किन्तु अधुना राज्यसर्वकारः नूतनयोजनां प्रवर्त्तयितुं सहमतः जातः। केन्द्रसर्वकारेण अपि अस्य कृते प्रथमः अंशः विमुक्तः।पूर्वं केन्द्रसर्वकारेण नूतनयोजनायाः आरम्भपर्यन्तं 'मनरेगा' अन्तर्गतमेव कार्यदिवसाः दत्ताः आसन्। अधुना ते सर्वे नूतनयोजनायां परिवर्तिताः (Port) भविष्यन्ति। यद्यपि पूर्वम् एतादृशम् आकलनम् आसीत् यत् मनरेगा-समाप्त्या नूतनयोजनायाः कारणात् हिमाचलप्रदेशस्य प्रतिवर्षं सप्तशतकोटि (७०० Cr) रूप्यकाणां हानिः भवितुं शक्नोति। वर्तमानकाले हिमाचलः प्रतिवर्षं प्रायः चतुर्दशशतकोटि (१४०० Cr) रूप्यकाणां कार्याणि करोति, यानि अधुना अर्धीभूतानि भविष्यन्ति।

## योजनायाः स्वरूपं आह्वानानि च

पञ्चायतीराज-ग्रामीणविकासविभागेन अस्मिन् विषये एकः प्रतिवेदनः राज्यसर्वकाराय समर्पितः। केन्द्रेण मनरेगा-स्थाने या नवीना योजना 'वी.बी.जी. राम' इति लागू कृता, तस्यां रोजगारदिवसाः शततः (१००) पञ्चविंशत्यधिकशतं (१२५) यावत् वर्धिताः। तथापि अनेके नूतनाः नियमाः हिमाचलस्य हिते न प्रतीयन्ते स्म। येषां राज्याणां जनसङ्ख्या न्यूना अस्ति, तेषां कृते स्वाभाविकतया हानिः वर्तते।नूतनयोजनायां जिलापरिषत्सु नियुक्तानां अधिकारिणां कर्मचारिणां च कृते दीयमानं धनं समाप्तं कृतम्। एतासां सर्वासाम आशङ्कानां सत्यपि नवीना योजना कार्यान्विता क्रियते, यतः अन्यविकल्पस्य अभावे राज्यस्य महती हानिः भवितुं शक्यते स्म।

# शिमला-: हिमाचलप्रदेशोच्चन्यायालयेन शास्त्री-अध्यापकानां नियुक्तौ अन्तरिम-प्रतिबन्धः आरोपितः



शिमला (हिमाचलप्रदेशः): हिमाचलप्रदेशोच्चन्यायालयेन राज्ये प्रचलन्त्यां शास्त्री (संस्कृत) अध्यापकानां नियुक्तिप्रक्रियायां कठोरं संज्ञानं स्वीकुर्वन् अन्तरिम-प्रतिबन्धः आरोपितः। उच्चन्यायालयेन राज्यसर्वकारं निर्दिशन् उक्तं यत् २५ अप्रैल २०२६ दिनाङ्कस्य प्रैसनोट-माध्यमेन सूचितायाः जिलावार-चयनसूच्याः आधारेण कस्मैपि अभ्यर्थिने नियुक्तिः न प्रदातव्या।न्यायाधीश-विवेकसिंहठाकुरस्य तथा न्यायाधीश-रञ्जनशर्मणः खण्डपीठेन इयं व्यवस्था डिम्पल बाला इत्यस्याः अन्येषां च याचिकायाः प्रारम्भिक-श्रवणानन्तरं दत्ता।

**न्यायालयस्य मुख्याः निर्देशाः-:**पूर्वनिरस्त-परिपत्रस्य अवैधताः न्यायालयेन स्पष्टीकृतं यत् राज्यसर्वकारः ११ अक्तूबर २०२३ दिनाङ्कस्य तस्य परिपत्रस्य (Circular) आधारेण नियुक्तयः कर्तुं नार्हति, यं परिपत्रं न्यायालयेन पूर्वमेव निरस्तं कृतम् अस्ति।

**अवमाननायाः स्थितिः-:** खण्डपीठेन टिप्पणी कृता यत् यदा ३० दिसम्बर २०२४ दिनाङ्के (हेमन्तशर्मा बनाम राज्यसर्वकारः इति प्रकरणे) सम्बद्धः परिपत्रः निरस्तः जातः, तदा तस्यैव आधारेण पुनः प्रक्रिया-सञ्चालनं प्रथमदृष्ट्या अवैधं न्यायविरुद्धं च वर्तते।

**याचिकाकर्तॄणां तर्काः:** याचिकाकर्तृभिः मुख्यरूपेण बी.एड. (B.Ed) उपाधिधारकानां शास्त्री-पदे नियुक्तिप्रक्रिया आव्हापिता। तेषां पक्षः अस्ति यत्:

१. शिक्षणविभागः तस्य नियमस्य अनुपालनं करोति यः न्यायपालिकया अमान्यः घोषितः।

२. २५ अप्रैल २०२६ दिनाङ्कस्य प्रैसनोट्, यस्मिन् 'प्रशिक्षण-आधारे' (Trainee Basis) चयनसूची प्रकाशिता, सा सर्वथा नियमानां विरुद्धा अस्ति।

३. यदि अस्मिन् स्तरे नियुक्तयः न स्थग्यन्ते, तर्हि योग्यानां अभ्यर्थिनां अपूरणीया क्षतिः भविष्यति।

**निष्कर्षः-:** न्यायालयस्य अस्मात् निर्णयात् परं शिक्षणविभागः आगामि-आदेशपर्यन्तं नियुक्ति-प्रक्रियाम् अग्रे नेतुं न शक्ष्यति। उच्चन्यायालयेन स्पष्टं कृतं यत् निरस्त-नियमानां आधारेण कृता कापि शासकीय-कार्यवाही वैधानिकी न मन्यते। अग्रिम-श्रवणे सर्वकारेण स्वपक्षः उपस्थापनीयः भविष्यति।

# निर्वाचनोत्तरं प्रज्वलन् पश्चिमवङ्गः, भाजपा-नेतुः सहायस्य हत्या हावड़ा-जनपदे च विस्फोटाः




पश्चिमवङ्गराज्ये निर्वाचनोत्तर-हिंसायाः शृङ्खला अविरतं प्रचलति। तृणमूलकाङ्ग्रेस-कार्यालयस्य, कार्यकर्तृणां तथा प्रत्याशिनां उपरि भूयमानानां आक्रमणानां मध्ये बुधवासरस्य अर्धरात्रौ भाजपा-नेतुः शुभेन्दु-अधिकारिणः निजी-सहायकस्य (PA) चन्द्रनाथ-रथस्य हत्या कृता। अपि च, गुरुवासरे हावड़ा-जनपदे सञ्जातेन भीषणेन गोलक-विस्फोटेन (Bombing) स्थितिः अधिका गम्भीरा अभवत्।

वृत्तानुसारं, तृणमूलकाङ्ग्रेस-समर्थकैः कथितरूपेण 'क्रूड-बॉम्ब' इत्यनेन आक्रमणं कृतम्, यस्मिन् भारतीयजनतापक्षस्य द्वौ कार्यकर्तारौ क्षतविक्षतौ जातौ। उभौ घायलावस्थायं सद्यः चिकित्सालयं प्रविष्टौ, यत्र तयोः उपचारः प्रचलति। अनया घटनया क्षेत्रे महत्तरः तनावः व्याप्तः, सुरक्षाव्यवस्था च सुदृढा कृता। अधुना आरक्षकाः (Police) प्रकरणस्य अन्वेषणं कुर्वन्ति, आक्रमणस्य पृष्ठतः कारणानि ज्ञातुं च प्रयतन्ते। इतः पूर्वं बुधवासरस्य सायं काले उत्तर-२४ परगणा जनपदस्य मध्यमग्रामे 'दोहड़िया' इति स्थाने द्विचक्रिकावाहनेन (Bike) आगतेन एकेन आततायिना शुभेन्दु-अधिकारिणः सहायकस्य चन्द्रनाथस्य कार-यानस्य उपरि गोलिकाप्रहारः (Firing) कृतः। याने चन्द्रनाथेन सह तस्य चालकः बुद्धदेवः अपि आसीत्। यदा उभौ स्थानीयचिकित्सालयं नीतौ, तदा चिकित्सकैः चन्द्रनाथः मृतः घोषितः। अपरपक्षे, बुद्धदेवस्य गम्भीरस्थितिं दृष्ट्वा सः कोलकातायाः 'ई.एम. बाईपास' समीपस्थं चिकित्सालयं प्रति प्रेषितः अस्ति।अस्मिन्नेव क्रमे गुरुवासरे शुभेन्दु-अधिकारिणः निजी-सहायकस्य (PA) चन्द्रनाथ-रथस्य शवपरीक्षा-प्रतिवेदने (Post-mortem report) इदमनावृतं यत् तस्य शरीरे ७.६ बोर (7.6 bore) परिमाणस्य तिस्रः गोलिकाः लग्नाः आसन्, येन तस्य हृदयं गम्भीररूपेण क्षतिग्रस्तं जातम्। अत्यधिक-रक्तस्रावेन अङ्ग-वैफल्यात् (Multi-organ failure) तस्य मृत्युः अभवत्। इदमपि ज्ञातं यत् गोलिकाप्रहारस्य तथा उपचारस्य मध्ये सुदीर्घः कालः व्यतीतः, येन रक्तहानिः अधिका अभवत्।अस्याः हत्यायाः अन्वेषणार्थं सर्वकारेण 'विशेष-अन्वेषण-दलम्' (SIT) गठितम्, यत् अपराधस्थलात् साक्ष्यानि सङ्गृह्णाति। आरक्षकाः अस्मिन् प्रकरणे त्रीन् जनान् निरुद्धवन्तः (Detained)। आरक्षकाणां दावः अस्ति यत् हत्यायां प्रयुक्ता द्विचक्रिका (Bike) अपि प्राप्ता अस्ति। भाजपा-नेता शुभेन्दु-अधिकारी गुरुवासरे अवदत् यत् तस्य निजी-सहायकस्य चन्द्रनाथस्य हत्या केवलम् अस्मात् कारणात् अभवत् यतः तेन (शुभेन्दुना) ममता-वन्द्योपाध्याया पराजिता। अस्याः क्रूर-हत्यायाः यावती निन्दा क्रियेत, सा अल्पा एव। सः अवदत् यत् भवानीपुरतः ममतायाः पराजयः एव अस्याः हत्यायाः कारणं भवितुं शक्नोति। अधिकारी महोदयेन इयं हत्या 'सुनियोजितं हत्याकाण्डम्' (Planned Murder) इति उक्तम्।

# परौर-राधास्वामी-सत्संगस्योपरि 'एनजीटी' (NGT) इत्यस्य प्रतिकारः, गिरिकर्तनस्य मृत्तिकायाः निक्षेपस्य च आरोपः

काङ्गड़ा-जनपदस्य परौर-स्थितस्य राधास्वामी-सत्संग-ब्यास इत्यस्य विस्तारकार्येषु पर्यावरणीय-नियमानां पूर्णतया उल्लङ्घनस्य संवेदनशीलं प्रकरणं प्रकाशम् आगतम्। हिमाचलप्रदेश-राज्य-प्रदूषण-नियन्त्रण-मण्डलेन (HPPCB) गते मासे 'एनजीटी' (National Green Tribunal) मध्ये यत् प्रतिवेदनं समर्पितं, तत् कस्यचित् भयप्रदस्य सत्यस्य सदृशं वर्तते।प्रतिवेदनानुसारं, न केवलं पर्वतानां निकृन्तनं (कटाई) कृतम्, अपितु स्थानीय-पारिस्थितिकी-तन्त्राय (Ecosystem) अपूरणीया क्षतिः अपि कारिता।



# संस्कृतं मधुरं सदा -२६

यदा कश्चन मनुष्यः सर्वान् प्राणिनः परमात्मनि एव निरन्तरं पश्यति, तथा सर्वप्राणिष्वपि तं परमात्मानं हि पश्यति, तदा सः कस्यापि निन्दनं कर्तुं नार्हति, न वा कमपि कदापि च सः जुगुप्सते।

परमात्मविषये सम्यक्तया ज्ञातवतः महापुरुषस्य कृते, अस्यां स्थितौ, सर्वाणि भूतानि परमात्मस्वरूपाणि एव भवेयुः। तस्मात् एकत्वम् अनुपश्यतः पुरुषस्य अनुभवे कः मोहः, कः वा शोकः हि अवशिष्यते? तस्मिन् तु केवलम् आनन्दः हि आनन्दः परिपूर्णः भवति। सः महापुरुषः तेजोमयेन सूक्ष्मशरीरेण रहितः, छिद्ररहितः, स्नायुरहितः, पाञ्चभौतिकजन्येन स्थूलशरीरेण रहितः च भवति। सः अप्राकृतः, दिव्यः, सच्चिदानन्दस्वरूपः च भवति। सः शुभाशुभकर्मादिभिः सम्पर्कशून्यं परमात्मस्वरूपम् अधिगच्छति। यः परमात्मा सर्वद्रष्टा, सर्वज्ञः, ज्ञानस्वरूपः, सर्वोपरि विद्यमानः, सर्वनियन्ता, स्वयम्भूः, अनादिः, प्राणिभ्यः कर्मानुसारं यथायोग्यं फलदाता एवञ्च सर्वेषां स्रष्टा वर्तते। सः महापुरुषः एतादृशं परमात्मानं प्राप्नोति।

यः मनुष्यः अविद्यायाः उपासनं करोति, सः तमसावृतम्, अज्ञानरूपं गर्तं प्रविशति। एवं यः विद्यारतः, परं मिथ्याज्ञानाभिमानेन उन्मुक्तः, एतादृशः मनुष्यः चेत् इतोऽपि अधिकतरे घोरान्धकारे निपतति। ज्ञानस्य यथार्थानुष्ठानेन एकविधं फलं भवति, तथा कर्मणः यथार्थानुष्ठानेन अपरविधं च फलं भवतीति कथ्यते। एवं प्रकारेण धीरपुरुषाणां वचनं श्रूयते, ये अनयोर्विषये पृथक्पृथक् रीत्या व्याख्यानं विधाय मनुष्यान्, अस्मान् वा सम्यक् बोधयन्ति इति।




# 🙏 कुलमातान्नपूर्णाष्टकम् 🙏

जढुआग्रामवास्तव्यो विप्रकुलशिरोमणिः।
राजमाता तद्विप्राणां मत्प्रपितामही महान्।।1
सुमाता पञ्चपुत्राणां सम्पन्नवंशकारकी।
वंशजानां कृते माता सदा कष्टनिवारिणी।।2
त्रिपुत्रीणामियं माता साक्षात्सिद्धिप्रदायकी।
कर्मणि धर्मणि सदा संघर्षकारिणी।।3
विप्राणामग्रगण्यस्तु एतस्याः प्रथमस्सुतः।
हरिनारायणं वन्दे ज्येष्ठं पितामहं मम।।4
द्वितीयस्तनयो वैद्यः सूर्यनारायणं प्रियम्।
मनसा कर्मणा वाचा वन्दे पितामहं परम्।।5
तृतीयस्तनयो पूज्यो लक्ष्मीनारायणं ननु।
होमियोपैथिकं विज्ञो वन्दे पितामहं स्वकम्।।6
चतुर्थशिक्षकः पुत्रः चन्द्रनारायणं तथा।
शिक्षायां सिद्धहस्तोऽयं वन्दे पितामहं ततः।।7
पञ्चकस्तनयो मुख्यः सर्वकारे नियोजितः।
शेषनारायणं विज्ञं वन्दे पितामहं परम्।।8
एते पञ्चसुपुत्रास्तु मात्रे समर्पितं सदा।
यापितं धनाभावे तैः सुजीवनं वरं ननु।। 9
कुलमातान्नपूर्णायाः संघर्षयुक्तजीवनम्।
संघर्षेऽपि सदानन्दं यापितं पूर्णजीवनम्।।10
अन्नपूर्णाष्टकं पुण्यं भाषितं रविरञ्जनैः।
समृद्ध्ये वंशवृक्षाणाम् तासां कृपा भविष्यति।।11

**झाकोशः झोपाख्यो रविरञ्जनः**
**05-05-2026 दिवसीय रात्रौ 10:29 वादने**

# अध्यापकसम्मानस्य महत्त्वम्

अद्यतनसमाजे अध्यापकाणां स्थानं अतीव उच्चम् अस्ति। ते केवलं पाठ्यज्ञानं न ददति, अपि तु बालकानां चरित्रनिर्माणे अपि महत्त्वपूर्णां भूमिकां निर्वहन्ति। अतः सर्वैः बालकैः पालकैश्च अध्यापकाणां आदरः कर्तव्यः।

यदा बालकाः शिक्षकैः किंचित् शास्यन्ते, तदा तत् तेषां हिताय एव भवति। शिक्षकाः सदा शिष्याणां उज्ज्वलभविष्यस्य निर्माणाय प्रयत्नशीलाः भवन्ति। अतः मातापितरौ अपि एतत् अवगन्तुं युक्तम् यत् शिक्षकैः कृतं शासनं न ताडनार्थम्, किन्तु मार्गदर्शनार्थं भवति। अधुना केचन पालकाः स्वबालकानां कृते अध्यापकान् प्रति अनादरं दर्शयन्ति, येन समाजे अनुशासनस्य ह्रासः जायते। यदि वयं अद्य एव अध्यापकानां सम्मानं न शिक्षामः, तर्हि भविष्ये वृद्धाश्रमाणां आवश्यकता वर्धते, यतः असम्मानभावः एव तस्य कारणं भवति। अतः आवश्यकम् यत् वयं सर्वे मिलित्वा अध्यापकानां प्रति श्रद्धां, आदरं च वर्धयेम। बालकान् अपि शिक्षयेम यत् ते स्वगुरून् सम्मानयन्तु। एवमेव समाजे सदाचारः, संस्काराः च सुरक्षिताः



**लेखिका:- आचार्या रमनदीप कौर, संस्कृत विदुषी एवं हिन्दुस्तानी शास्त्रीय गायिका च**



# "लौकिकन्यायकोशः"दीपकलिकान्यायः

कलिका नाम कलिकासदृशी दीपशिखा। कलिका इव भवति चेदपि दीपशिखा स्वप्रकाशं दूरे अपि प्रसारति एवं वयसा कनीयान् सन् अपि कश्चन तेजस्वी गुणैः ज्येष्ठः भूत्वा स्वयशसः प्रकाशं सर्वत्र प्रसारयति इति अस्य न्यायस्य भावः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# सायं शोभनं समयश्शोभनः

सायं शोभनं, समयश्शोभनः
सायं शोभनं, समयश्शोभनः
मय्यनुबोधता त्वय्यनुबोधता
इतोऽधिकता किम् ईप्स्यते शम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम् -- (०१)
अहं जाने त्वयि, मां त्वं जानीहि
अहं चिन्वे तव, त्वं ममापि चिनु
भृशं साहजं प्रेम्णः व्याकरणम्
वचः मे शृणु, शृणुयां ते वचः
वचः मे शृणु, शृणुयां ते वचः -- (०२)
प्रेम्णि रत्नमहं, त्वन्नु रत्नमपि
एकं त्वं बध्नीया, एकमहं बन्धये
नव्यकाव्यमुभौ नु रचयावहे
किञ्चित्त्वं मिले भो, किञ्चिदहं मिलेय
किञ्चित्त्वं मिले भो, किञ्चिदहं मिलेय -- (०३)
सायं शोभनं, समयश्शोभनः
मय्यनुबोधता त्वय्यनुबोधता
इतोऽधिकता किम् ईप्स्यते शम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम्



प्रेम्णि रत्नमहं, त्वन्नु रत्नमपि
नव्यकाव्यमुभौ नु रचयावहे
किञ्चित्त्वं मिले भो, किञ्चिदहं मिलेय
सायं शोभनं, समयश्शोभनः
मय्यनुबोधता त्वय्यनुबोधता
इतोऽधिकता किम् ईप्स्यते शम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम्
त्वं मयि वर्तसे, त्वयि वर्तेऽहम्
त्वं मयि वर्तसे,त्वयि वर्तेऽहम् -- (०४)

**रचयिता- आचार्यः डॉ. रुरुकुमारमहापात्रः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य बह्व्यः विचित्राः वार्ताः श्रुताः सन्ति।
**नन्दिनी-** सत्यम्। प्रथमतः बेङ्गलूरु-नगरस्य वार्तां पश्य। तत्र एकया अमेरिकादेशीयया महिलया अनुभूतं कष्टं प्रकटितम्। तया उक्तं यत् तस्याः गृहस्वामिना गृहभाटकं त्रिंशत्-प्रतिशतं वर्धितम्।
**काव्या-** एतत् तु अतिशयितं कष्टम्। गृहाणां मूल्यं गगनस्पृक् जातम् अस्ति। भाटकवार्तायाः अनन्तरं शिक्षाविषयिणी वार्ता श्रोतव्या। तस्मिन्नेव नगरे एकेन उद्योगिना दृष्टं यत् तस्य षड्वर्षीयः पुत्रः विद्यालये धनसञ्चयविषये यू-पी-आई व्यवहारविषये च शिक्षितः।
**नन्दिनी-** बालेभ्यः तादृशं शिक्षणम् आवश्यकम् एव। धन-शिक्षणम् बाल्ये एव प्राप्तं चेत् उत्तमम्। धनस्य अनन्तरं श्रमस्य वार्ता। एकया अन्यया उद्योगिन्या स्वकर्मकराः उक्ताः यत् ते विश्रान्तिं कुर्युः। श्रमात् विरामः प्राप्तः चेत् कार्यक्षमता वर्धिता इति तया अनुभूतम् अस्ति।
**काव्या-** विश्रान्तिः तु मनुष्यस्य अधिकारः। श्रान्ताः जनाः कार्यं कर्तुं न शक्नुवन्ति। एतस्याः उत्तम-वार्तायाः पश्चात् अन्तिमा वार्ता अतीव हृद्या अस्ति। एकेन वरेण चलतः यानात् वैदेशिक- पर्यटकाय स्व-विवाह-निमन्त्रण-पत्रं दत्तम्।
**नन्दिनी-** अहो! एतत् तु दासत्वस्य अनुपमं निदर्शनम्। ते पर्यटकाः अपि विस्मिताः जाताः सन्ति। अद्य एताभिः वार्ताभिः अलम्। धन्यवादः।